# श्री यंत्रोधारक हनुमत् स्तोत्रं

नमामि दूतं रामस्य सुखदं च सुरद्रुमम्
पीनवृत्त महाबाहुं सर्व शतृ निवारणं ||1||
नानारत्न समायुक्तं कुंडलादि विराजितम्
सर्वदाभीष्ठदातरां सतां वै धृढमावहे ||2||
वासिनं चक्र तीर्थस्य दक्षिणस्थ गिरौसदा
तुंगांबोधि तरंगस्य वातेन परिशोभिते ||3||
नानादेशगतैः सद्भिः सेव्यमानं नृपोत्तमैः
धूपदीपादि नैवेदैः पंचखाद्यैश्चशक्तितः ||4||
भजामि श्री हनूमतं हेमकांति समप्रभम्
व्यासतीर्थ यतींद्रेण पूजितं प्रणिधानतः ||5||
त्रिवारं यः पठेन्नित्यं स्तोत्रं भक्त्या द्विजोत्तमः
वांछितं लभते भीष्टं षण्मासाभ्यंतरे खलु ||6||
पुत्रार्थि लभते पुत्रान् यशार्थि लभते यशः
विद्यार्थि लभते विद्यां धनार्थि लभते धनं ||7||
सर्वथा मास्तु संदेहो हरिः साक्षी जगत्पतिः
यःकरोत्यत्र संदेहं सयाति नरकं धृवम्||8||
इति श्री यंत्रोधारक हनुमत् स्तोत्रं परिपूर्ण ||